# দত্তলহরী

{॥ দত্তলহরী ॥}

শ্রীগণেশায নমঃ

দলাদন ঋষিরুবাচ ।

বিভুর্নিত্যানন্দঃ শ্রুতিগণশিরোবেদ্যমহিমা

যতো জন্মাদ্যস্য প্রভবতি স মাযাগুণবতঃ ।

সদাধারঃ সত্যো জযতি পুরুষার্থৈকফলদঃ

সদা দত্তাত্রেযো বিহরতি মুদা জ্ঞানলহরিঃ ॥ ১॥

হরীশব্রাহ্মাণঃ পদকমলপূজাং বিদধতে

জগদ্রক্ষাশিক্ষাজননকরণে তে হ্যধিকৃতাঃ ।

অভূবন্নিন্দ্রাদ্যা হরিদধিপতাং দেবমুনযঃ

পরং তত্ত্বং প্রাপুঃ শশিদিনকরৌ জ্যোতিরমলম্ ॥ ২॥

পরং জ্যোতির্মূর্তে তব রুচিরতেজঃ কলরবাজ্-

জগধ্ব্যাপ্যেদানীং তপনশশিতারাহুতভুজঃ ।

মহাতেজঃপুঞ্জাঃ সকলজগদারাধ্যচরিতাশ্-

চরন্ত্যেবং লোকান্নতজনমনোভীষ্টফলদাঃ ॥ ৩॥

ভবন্মাযারূপং জগদখিলজীবাত্মকমিদং

ভবদ্রূপং প্রাহুর্নিখিলনিগমান্তশ্রুতিচযাঃ ।

ত্বয়া সৃষ্টং চাদৌ হৃতমবিতমেতত্তদধুনা
প্রভাবং তে বেত্তুং প্রভবতি জনঃ কোঽবনিতলে ॥ ৪॥

কৃপাসিন্ধো তাবজ্জনুরজননস্থাপ্যকথিতে
জগদ্রক্ষাদীক্ষা ভবতি খলু নো চেৎকথমিদম্ ।
অনিহস্যাঽকর্তুস্তব জগতি কর্মোপকৃতয়ে
প্রমাণীকর্তুং বা স্বকৃতনিগমার্থানিতি মতিঃ ॥ ৫॥

মহাবিদ্যারূপে ভগবতি নিবদ্ধত্বমুচিতং
হৃদা বাচাগম্যে পরমপি বিমুহ্যন্তি কবয়ঃ ।
অবিদ্যাতীতঃ কিং যদি গুণবিহীনোপি গুণবান্-
অবিদ্যাযুক্তোয়ং ত্বিতি বদতি মায়ামুষিতধীঃ ॥ ৬॥

ভবানাদৌ যাদোনরমৃগমুখশ্বাদিকতনূর্-
বিধত্তে লোকানামবনকৃতিহেতোরনুযুগম্ ।
বিশুদ্ধস্ত্বং লীলানরবপুরিদানীমটসি গাং
পবিত্রীকর্তুং বা পরিজননিবাসাঙ্গণতলম্ ॥ ৭॥

জগদ্রক্ষার্থং বা বিচরসি জগত্যাত্মজনতা-
পরিত্রাণায়াদ্যঃ পরমপুরুষোঽগম্যচরিতঃ ।
মৃষালোকো লোকো বদতি মনুজত্বং তদধুনা
যয়া শ্রীকৃষ্ণত্বং যদবব্রুবতে মূঢমতয়ঃ ॥ ৮॥

মহাযোগাধীশৈরবিদিতমহাযোগচতুরং

কথং জানন্তি ত্বাং কুটিলমতযো মাধ্শজনাঃ ।

তথাপি ত্বাং জনে তব পদযুগাম্ভোজভজনান্ন

চেত্ত্বৎপাদা স্মৃতিবিষযবাণী কথমভূত্ ॥ ৯॥

অপারে সংসারে সুতহিতকলত্রাদিভরণা -

দ্ব্যপাধৌ মন্নাস্তত্তরণকরণোপাযরহিতাঃ ।

পতন্তি ত্বৎপাদাম্বুজযুগলসেবাসু বিমুখা

নরাঃ পাপাত্মানঃ প্রবরনরকে শোকনিলযে ॥ ১০॥

সুধাসিন্ধৌ দ্বীপে কনকলতিকে কল্পকবনে

বিতানৈর্মুক্তাঢ্যৈর্নবমণিমযে মণ্ডপবরে ।

অশেষৈর্মাণিক্যৈঃ খচিতহরিপীঠেঽন্ কুহরে

হুতাশারে ধ্যাযেত্তব পরমমূর্তিং নিখিলদাম্ ॥ ১১॥

ধরাধারাধারে হুতবহপুরেধীশগণপং

বিধিং শ্রীশেষৌ বানলপবনব্যোমানি হৃদযে ।

যুতৌ জীবাত্মানাবধিকমবমত্যা প্রবিশতে

বিধত্তে জাযাত্বং পরকলিতবামেন বপুষা ॥ ১২॥

সহস্রারে নীরেরুহি সকলশীতাংশুললিতে

সহসে হংসং যঃ স্ফুটমপি ভবন্তং কলযতে ।

সুষুম্নাবর্তিন্যাং তব চরণপীঠেন্দুসুধযা -

প্লুতো ভিত্ত্বা গ্রন্থিত্রযমমৃতরূপো বিচরতি ॥ ১৩॥

তবাধারে শক্তিস্থিতকমলকর্মাদ্যভিবৃতে

মহাপীঠে বৈশ্বানরপুরমরুদ্গেহনিলযে ।

ধরাব্যোমাকল্পে সুরমুনিমহেন্দ্রাদ্যভিনুতং

মহাতেজোরাশিং নিগমনিলযং নৌমি হৃদযে ॥ ১৪॥

ভবৎপাদাম্ভোজং ভবজলধিপোতং ভজতি যো

মহাসংসারাব্ধিং তনণিতরতীত্যেব নিগমঃ ।

ইহামুত্র ত্রাতুং তব চরণমেবাত্মশরণং

ভবেদ্ধীরো বাহঙ্কৃতিপরমনস্কোযমধুনা ॥ ১৫॥

যথা দারুষ্বগ্নির্নিবসতি তথা দেহনিকরে

প্রবিশ্য ত্বং চৈকো বহুবিধ ইবাভাসি তি তথা ।

চলন্নীরে চন্দ্রঃ শতবিধ ইবাভাতি গুণতো

ন চৈতচ্চন্দ্রে স্যান্ন শতবিধতা নাপি চপলম্ ॥ ১৬॥

দরিদ্রো বা মূঢঃ কঠিনহৃদযো বাপি ভবতাং

দযাপাত্রং স্যাচ্চেদ্ভজতি মহতামপ্যধিকতাম্ ।

ন বিদ্যা রূপং বা ন কুলমপি বা কারণমভূন্ -

মহত্ত্বে সেবৈকা তব পদযুগাম্ভোজকলনা ॥ ১৭॥

ন তে কারুণ্যং স্যাৎসকলগুণবানপ্যগুণবান্
ভবৎকারুণ্যং স্যাদগুণগণপো বোরুগুণবান্ ।
যথা পত্যৌ রক্তে যদপি চ বিরক্তে চ যুবতৌ
বৃথা সৌন্দর্যং স্যাৎসকলমপি তেঽনুগ্রহবশাত্ ॥ ১৮॥

অনাথে দীনে মত্যধিগতভবৎপাদশরণে
শরণ্যব্রহ্মণ্যপ্রথিতগুণসিন্ধো কুরু দযাম্ ।
মহাতেজোবার্ধে স্বসুকৃতমহিম্নৈব সততং
পুরা পুণ্যৈর্হীনং পুরুষমুপকুর্বন্তি কৃতিনঃ ॥ ১৯॥

মহাশ্বেতদ্বীপেঽমরুতরুগণাত্যন্তরুচিরে
মণেঃ পীঠাম্ভোজেঽনলশশিখগান্তর্নিবসিতম্ ।
গদাচক্রাজাসিপ্রসৃতকরপদ্মং মুররিপুং
স ধন্যস্ত্বাং ধ্যাযেৎপরতরচিদানন্দবপুষম্ ॥ ২০॥

লসন্মেরোঃ শৃঙ্গে সুরমণিমযে কল্পকতরু -
প্রকীর্ণে বাক্পীঠে রবিশশিশিঙ্করাকীর্ণজলজে
স্থিতং বাচাধীশৈর্নুতমনুদিনং ত্বাং ভজতি যো
ভবেদ্বাণীশানামপি গুরুরজেযোঽবনিতলে ॥ ২১॥

সমুদ্যদ্বালার্কাযুতনিভশরীরং মুনিবরং
স্থিতং বীজে মারে ত্রিদশপতিগোপাতিরুচিরে ।

হৃদি ত্বাং যঃ পশ্যন্ সুখকরমিতি ধ্যাযতি সদা
স এবাহং নূনং স ভবতি জগন্মোহনকরঃ ॥ ২২॥

নির্ধির্বিশ্বেষাং ত্বং নিজচরণপদ্মদ্বযবতাং
শরণ্যশ্চার্কানাং চকিতহৃদযানামভযদঃ ।
বরেণ্যঃ সাধূনাং বরদ ইতি বা কামিতধিযাং
ভবৎসেবা জন্তোঃ সুরতরুসমানা ন ফলতি ॥ ২৩॥

যথা বৈ পাঞ্চালী নটতি কুহকেচ্ছানুশরণং
কুলালেন ভ্রান্তং ভ্রমতি চ সকৃচ্ছক্রমনিশম্ ।
তথা বিশ্বং সর্বং বিযতি মনবশ্চানুগুণিতাঃ
স্বতন্ত্রঃ কো বাস্তে বদ পরসুরেশস্ত্রিভুবনে ॥ ২৪॥

ত্বযাজ্ঞপ্তো ধাতা সৃজতি জগদীশোঽপি হরতে
হরিঃ পুষ্নাতীদং তপতি তপনো যাতি পবনঃ ।
ধরাং সাদ্রিদ্বীপাং বহতি ভুজগানামধিপতিঃ
সুরাঃ সর্বে যুষ্মদ্ভযপরবশাদ্বিভ্রতি বলিম্ ॥ ২৫॥

স্বযং মুক্তেঃ পূর্বং স্বকৃতসুকৃতং মাং নযতি চেত্
ভবাসত্বং কা বা তব চরণপঙ্কেরুহরতিঃ ।
হরেৎপাপৌধং নঃ শুভমপি দদাতীতি চ সদা
ভবন্ত্যাশাবদ্ধাঃ সকলমপি ধাতুর্বশমহো ॥ ২৬॥

প্রধানং বা কর্ম স্থিতিবিলযসর্গেলমিতি চেত্
জডত্বাৎক্ষীণত্বাৎকথমুচিতমেতন্নিগদিতুম্ ।
তযোরীশোঽনীশে ভবতি জগদুৎপত্তিবিলযা -
বনান্যাসন্ ব্রহ্মাস্ত্বিতি বদতি শাস্ত্রং শ্রুতিরপি ॥ ২৭॥

ভবৎেসবা জন্তোর্ভবদবহুতাশাম্বুদনিভা
মহামোহধ্বান্তপ্রতিহতমতের্দীপকলিকা ।
সুধাবর্ষিণ্যেষা বিহিতমনসাং নির্মলনৃণা -
মুপাধ্যাযে ব্রহ্মপ্রবচনবিধানেঽতিচতুরা ॥ ২৮॥

অবজ্ঞাযৈ লোকে বহুপরিচিতিঃ প্রাকৃতমতিঃ
নিরস্যাপো গাঙ্গাঃ প্রসরতি যথা নাল্পতটিনীম্ ।
বিশুদ্ধ্যর্থং তত্ত্বং সকলপুরুষার্থৈকফলদং
ভবন্তং হিত্বান্যং ভজতি গুরুমাশাপরবশঃ ॥ ২৯॥

নিমীল্যাক্ষিদ্বন্দ্বং নিগমনিরতো নিশ্চলমনাঃ
প্রকাশন্তং দৃষ্ট্যা ত্রিভুবনমুদং জ্ঞানপরযা ।
ললাটেধোমুখ্যা রসজনিতদিব্যাঞ্জনধরং
স্মরেদ্যস্ত্বাং যোগী ভবতি নিধিসিদ্ধেরধিপতিঃ ॥ ৩০॥

মহামাযামন্ত্রাক্ষরকমলপদ্মাসনযুতং
মহানীলচ্ছাযং মধুমুদিতযোগিন্যভিবৃতম্ ।

দধানং সদ্বোধাসিতকনকগোক্ষীরতিলকং
মুনে যস্ত্বাং পশ্যেদ্ভবতি সকলাদৃশ্যকতনুঃ ॥ ৩১॥

সুধাধারে হেতৌ সকলজগতাং স্বর্ণকলিতে
সিতাম্ভোজে তেজোধিকতপনবিম্বে শ্রুতিতনৌ ।
মণিপ্রোতে পীঠে নিখিলসুরবৃন্দৈঃ পরিবৃতে
স্থিতং ত্বামারোগ্যং স্মরতি হৃদি তস্যামৃতময়ম্ ॥ ৩২॥

পরত্রাদাতা চেদ্ভবতি ন দদাত্যৈহিকসুখং
দদাত্যেতৎসৌখ্যং ন বিতরতি চামুষ্মিকসুখম্ ।
ভবৎসেবা জন্তোরিহ পরসুখপ্রাভবকরী
সুরাণামন্যেষামনুশরণমাত্মৈবমকরোত্ ॥ ৩৩॥

জটী বল্কী ক্বাপি ক্বচিদপি সুভূষাম্বরভৃতী
ক্বচিদ্ভূত্যালিপ্তঃ ক্বচিদপি সুগন্ধাঙ্কিততনুঃ ।
ক্বচিদ্যোগী ভোগী ক্বচিদপি বিরাগী বিহরসে
বহুজ্ঞানী জ্ঞাতুং তব গতিমশক্তাশ্চ মুনয়ঃ ॥ ৩৪॥

বিশুদ্ধং চৈতন্যং ক্বচন জডবৎক্বাপি সকলা -
গমজ্ঞোঽপ্যজ্ঞস্যাদ্বিহরসি কদাচিদ্বহুবিধঃ ।
ঋষিভ্যস্ত্বং তত্ত্বং পরমমুপদেষ্টাসি বিততং
চরিত্রং তে বেত্তুং চতুরধিকবক্ত্রা ন চতুরাঃ ॥ ৩৫॥

মণির্বা মন্ত্রো বা বিবিধবিমলৈশ্বর্যমপি বা

মহাযোগোষ্টাঙ্গাভ্যসনবিহিতো বা ত্রিভুবনম্ ।

সমর্থং চৈকৈকং প্রভবতি বিশীকর্তুমধিকং

স্থিতং ত্বয্যেবেদং তব কিমুত লোকৈকবশতা ॥ ৩৬॥

সরস্বত্যাধারস্থিতমরুদতিপ্রেরিতপরাং

নৃপো ধারাং ভিত্ত্বা রসকমলবাসাধিপপুরী ।

পরং তেজোরূপং সকলভুবনালোকনিরতো

ভবং তে সংযোগাৎপরমসমবেতং মুনিপতিঃ ॥ ৩৭॥

অপাং তত্ত্বং হংসং সকলভবদেবে জলরুহে

তডিদ্ভাস্বদ্দীপ্তিপ্রকটদলষট্কে সুললিতে ।

পরং স্বাধিষ্ঠানে রুচিরতররূপং নিরুপমং

স্থিতং ধ্যাযেত্ত্বাং যো মদনসমরূপো বিজযতে ॥ ৩৮॥

পরীতং ত্বাং বিষ্ণো হুতবহনমাযাবিলসিতে

সরোজে নীলাভে মণিরচিতপীঠে মণিগৃহে ।

মহাসিদ্ধেঃ কল্পদ্রুমবরতলে স্বর্ণনিচযাম্ -

প্রবর্ষদ্ভিঃ সস্যাৎপরমতনুভূতিঃ স্মরতি যঃ ॥ ৩৯॥

মরুন্ত্তারাপ্রাভে কনকরুচিপদ্মে শৃতিমযং

প্রভুং লোকাতীতং নিখিলনিগমাবেদ্যচরিতম্ ।

ভজন্তে যে ত্বাং তে সুদৃঢতরতাদাত্ম্যকদৃশা

চিদানন্দং মায়াগুণবিরহিতং যান্তি পরমম্ ॥ ৪০॥

সুধাশুদ্ধে ব্যোম্নি দ্রুহিণরমণীবীজলসিতে

বিশুদ্ধাম্ভোজান্তে সুরনরখগাদ্যন্তরহিতম্ ।

ভবন্তং ভাবোত্থৈঃ কুসুমমুখপূজোপকরণৈঃ

সমর্হল্লোকে না দ্বিতযপরমং ব্রহ্মভজতে ॥ ৪১॥

তডিল্লেখাশোচির্দ্বিদলকমলে ভাসি পরমো

মহাযুক্তানঙ্গোনলশশিভৃতোক্ষীণি ভবতঃ ।

অশেষস্রোত সু প্রসৃতচিতিরূপোড্গকনকঃ

শ্রুতিপ্রাণোষ্টাড্গপ্রগুণিতকলাপীঠ নিলযঃ ॥ ৪২ ॥ ???

ক্বচিদ্গুহ্যং জিহ্বা ক্বচ গুদকমন্যত্র কবিতা

ক্বচিদ্বাগন্যত্র শ্রুতিরপরতো লোচনযুগম্ ।

সমাকার্ষন্ত্যাত্মানমিব বহুভার্যাঃ প্রলুভিতা -

স্ততো ধ্যাতুং স্থাতুং কথমপি ন শক্তস্তব পদম্ ॥ ৪৩॥

অশক্তোহং স্নাতুং ক্ষণমপি জপং কর্তুমপি বৌ -

দনাভাবাদেবাতিথিজনসপর্যা চ ন কৃতা ।

কুতো জ্ঞানং ধ্যানং ত্বকৃতগুরুদেবস্য মম ভো

ভবেদেবৈকাশা বসতি তব ভক্তাত্বজনিতা ॥ ৪৪॥

অমন্দে মন্দারদ্রুমচরসমীপে মণিময়ে

সুখাসীনং পীঠে সুরবরমুনীন্দ্রাদিবিনুতম্ ।

স্বহৃৎপদ্মে বাপি স্থিতমনুদিনং ত্বাং ভজতি যঃ

স চেহামুষ্মিন্বা সকলজনপূজ্যশ্চ ভবতি ॥ ৪৫॥

তৃণং মেরুং কুর্যাৎসুরবরগিরিং বাপি চ তৃণং

ভবৎসামর্থ্যং বাঽঘটিতঘটনাপ্রৌঢিমতনো ॥

ইদং জানে তস্মৈ পুনরপি ন জানন্তি কবয়োঽ -

ঽপ্যহো যুষ্মন্মায়া সকলজনমোহোন্মদকরী ॥ ৪৬॥

নটো ভূয়ো বেষৈর্বহুবিধ ইবাভাতি সুগুণো

যথৈকো বাকাশো ঘটমঠগুহাস্বন্তরগতঃ ।

যথৈকং গাঙ্গেয়ং কটকমুকুটাধ্যাকৃতিবশাত্ -

তথা দত্তাত্রেয় ত্বমপি বহুরূপস্ত্রিভুবনম্ ॥ ৪৭॥

সহস্রাংশুপ্রাভে সুরতরুসমাঢ্যেঽধিকতরে

বিমানে হংসাখ্যে স্থিতমমৃতনীহারবপুষম্ ।

পরীতং ত্বাং ধ্যায়েদ্যদরজসমারূঢমনিলৈঃ

অশেষৈরাজ্ঞায়াং ভবতি খচরো ব্যোমগমনৈঃ ॥ ৪৮॥

স্থিতং মূলাধারে কনকরুচিরাঙ্গং হুতভুজঃ

শিখাভিঃ প্রখ্যাভির্বৃতমখিলতেজোরসঘটম্ ।
ধরন্তং ভ্রূমধ্যে প্রসৃতনযনঃ পশ্যতি চ যঃ
পরং ত্বাং সত্যং স্যাদখিলরসবিদ্যাতিনিপুণঃ ॥ ৪৯॥

শিরঃপ্রান্তভ্রান্তাযতকুটিলবালার্কমতুলং
প্রদীপ্তস্বর্ণাঢ্যারুণশতলসৎকুণ্ডলধরম্ ।
মরুৎপুত্রং লঙ্কাধিপতনুজনাশোদ্যতকরং
স্মরেদ্যস্ত্বাং যন্তাৎসকলভযভূতাপহরণে ॥ ৫০॥

গরুত্মন্তং চঞ্চচ্চলকনকপক্ষদ্বযযুতং
সুধাকুম্ভোদ্ভাস্বৎকরমখিললোকাভিগমনম্ ।
অচিন্ত্যং বৈদৈস্ত্বাং পরমমুনিনাথং স্মরতি যঃ
স দক্ষোঽসৌ বাদী কপটবিষজন্তুপ্রহরণে ॥ ৫১॥

স্মৃতিং নন্দন্তং যো মনুজমুপতিষ্ঠন্ত্যতিবলাত্
কৃতাশামিথ্যাদ্যাৎপ্রণতজনমন্দার ভবতা ।
অদত্তে দত্তত্বাদমলতরচিদ্দিগভ্যবিভবাঃ
সদা দত্তাত্রেযো ভজসি ভজতামিষ্টফলদঃ ॥ ৫২॥

বিধিং বিষ্ণুং মাযাং শৃণিমদনযোনিং দিনকরং
মিলিত্বানঙ্গেনানলযুবতিযুক্তাং জপতি যঃ ।
ত্বদাখ্যামাখ্যেযাং নিখিলনিগমাঢ্যামখিলদাং

স স্ম্পদ্ভির্দেবাধিপবিভবযুক্তো বিহরতি ॥ ৫৩॥

পরামাযাবাণীমদনকমলাবীজসহিতং

মনুং প্রত্যেকং তে জপতি সততং নিশ্চলধিযা ।

ততোঽভ্যৈত্যৈশ্বর্যশ্রুতসকলবিদ্যানিপুণতাং

বশিত্বং ত্রৈলোক্যং সপদি যদি যাযাৎপরমুনে ॥ ৫৪ ॥

অবিজ্ঞাতং কিঞ্চিত্তব জগতি নাস্তি প্রভবিতুঃ

তদাবিজ্ঞাতোঽহং যদপি সকলজ্ঞেন ভবতা ।

অদৃষ্টং মন্যেঽহং প্রতিভটমবিজ্ঞানকরণে

মুনে দত্তাত্রেয প্রকুরু মযি কারুণ্যমতুলম্ ॥ ৫৫॥

ভবৎপাদাম্ভোজদ্বয শুভরসাস্বাদ চতুর -

ভ্রমদ্ভৃঙ্গীসঙ্ঘাযিত হৃদয বৃত্তিং কলযমাম্ ।

অনাধারাধারাশ্রিতসুরতরো তাবকজনে

মুনে কারুণ্যাব্ধে প্রকুরুমযি সম্পৎপ্রকটনম্ ॥ ৫৬॥

বদন্ত্যেকেঽপার্থাং তব গতিমনেকার্থ করিণী

অজানন্তোজ্ঞেঽযামনধিগত তত্ত্বার্থ মতযঃ ।

মহাযোগিং ল্লোকে জডমতিকৃতে ত্বং ধৃতবপুঃ

তথা নোচেভ্দক্ত স্বজন পরিরক্ষা কথমহো ॥ ৫৭॥

স্মৃতস্ত্বচ্ছিষ্যো বা জগতি কৃতবীর্যস্য তনযো -

ঽর্জুনো রাজা চোরাদ্ভযমহিভযং বৃশ্চিকভযম্ ।

হিনস্ত্যাজৌ শত্রূদিতমপি ভযং চেতি গদিতং

ভবেযুস্ত্বচ্ছিষ্যাঃ কিমুতহৃত চোরাদিক ভযাঃ ॥ ৫৮॥

পদানাং সেব্যো বা ন ভবসি যদাঽকিঞ্চন নৃণাং

প্রিযঃ সাধূনাং ত্বং তব চ সুহৃদস্তেঽপি সুজনাঃ ।

মযিত্বার্তে দীনে জননমরণাদ্যৈঃ কুরুদযাং

দযাবাব্ধো বা মে ভ্রমনিগডনির্মোচনবিধৌ ॥ ৫৯॥

যথা মাতা পুত্রং সকলগুণহীনং চ কুটিলং

প্রপুষ্নাত্যন্নাদ্যৈরনুদিনমতীবাদরযুতা ।

তথা ত্বং লোকানাং মম চ পিতরাবিত্যভিমতং

ততস্ত্রাতুং দাতুং ফলমভিমতং চার্হসি বিভো ॥ ৬০॥

জডং বাচাধীশং সুধিযমপি মূইকং চ কুরুষে

রবের্বা শীতত্বং যদি চ কুরুপে দৃষ্টিবসতেঃ ।

অকর্তুং কর্তুং বাঽন্যদপি পরিকর্তুং চ মনুষে

তদা সর্বং কুর্যাঃ ক্বচন কিমসাধ্যং ত্রিভুবনে ॥ ৬১॥

পুমান্যো বৈ যুষ্মচ্চরণপরিচর্যাকৃতিপরঃ

মহালাপাস্থানাশনশযনপানানি কুরুতে ।

সর্বৈ ধন্যো লোকে সকলজগদারাধ্যগরিমা

অহো ভাগ্যং তস্যাগণিতযশসঃ কোঽপি ন ভজেত্ ॥ ৬২॥

প্রসাদাত্তে যস্মিন্প্রবলতরদারিদ্র্যবিভবঃ

স যাযাদিন্দ্রত্বং সকল সুরনারীপরিবৃতঃ।

তবোপেক্ষা যস্মিন্ভবতি স সুরাণামধিপতিঃ

পরত্রহ্যত্যন্তং প্রবিহতমহৈশ্চর্যবিভবঃ ॥ ৬৩॥

সদা মন্ত্রৈর্জাপ্যঃ পুনরপি মনূনেব জপসি

স্বযং তন্ত্রধ্যেযো যদপি কুরুতে তন্ত্রনিচযম্।

সদা ব্রহ্মানন্দামৃতজলধিকেলীকলিতধীঃ

স ভূতের্ভূযস্যা ভবতু ভগবন্নঃ কুরুদযাম্ ॥ ৬৪॥

তরীযাগ্নিশ্বেতদ্যুতিদিনকৃদর্কৈর্মুনিপতেঃ

মহাবিদ্যাখণ্ডৈঃ পরিযুতমহানুষ্টুভমনোঃ।

চতুর্ভিশ্চক্রাব্জাঽঙ্কুশগুণধরং সামিযুবতিং

নৃসিংহং ত্বদ্রূপং ভবতি সপুমর্থৈক নিলযঃ ॥ ৬৫॥

মুনে তে মাণিক্যপ্রবরখচিতে হেমমুকুটে

পুরাকল্পধ্বংসে পরিকলিতসূর্যাপররুচঃ।

বসন্ত্যস্মিন্নূনং নহি যদি তদা ভূতমুনযো

ন বিদ্যন্তে লোকাঃ প্রখরতিমিরান্তৈকচতুরাঃ ॥ ৬৬॥

অহো যোগিন্নানামণিখচিতভাবৎকমকুটঃ

শিখাগ্রালম্বিন্যাস্ত্রিক তলমসৌ রত্নশিখরাত্ ।

মহোমেরোর্লীলাং কলযতি সদা যামকলিতাং

শরৎসৌদামিন্যাঃ কটকবরতেজোমযতনোঃ ॥ ৬৭॥

সুবিজ্ঞাতং লোকৈরনবধিসদাদেশনপরৈঃ

সুধাভানোঃ খণ্ডং তব নিবিডভাবান্ধকরণম্ ।

দ্বিতীযং সোমেন্দুস্ফুটমুকুটতঃ কান্তমনঘং

মহামূর্তিজ্যোৎস্না হরতি নতদারিদ্র্যতিমিরম্ ॥ ৬৮॥

ধৃতং পুণ্ড্রং মাত্রাত্রিতযরুচিরং সাক্ষরমিদং

সহস্রারে হংসঃ স্থিতপরমহংসাজিগমিষোঃ ।

বহন্তী পাদাব্জদ্বযসরললাক্ষারসপদং

পরাশক্তেশ্চন্দ্রোপলরচিতসোপানপদবী ॥ ৬৯॥

শ্রযেতে হৈমন্তে তরুবিমলপত্রে মধুকরৌ

শুভং গর্ভাম্ভোজে স্থিতমিতি সুচিত্রং শমনিধে ।

কঠোরেন্দুপ্রাংশুপ্রবরনিকরীভূততিমিরং

সুধাম্শুর্ভাবৎকো মুকুলযতি বিদ্যুৎকুবলযম্ ॥ ৭০॥

তমোভির্মূকালীগৃহমিদমনুজ্জৃম্ভিতমিতি

ত্বদীযে নেত্রাব্জে কমলসদনা জৃম্ভিতবতী ।

সদা সুজ্ঞানেনাবিশতি সদযাক্ষি প্রসরতি

প্রভো যস্মিন্স্যাত্তে ধ্রুবমতিধনোঽযং মুনিপতে ॥ ৭১॥

যদা যোগিন্নীষদ্বলিরবিলসৎকোঽপ্যসদৃশো -

রূপান্তে নীলালী উদরযুগলী কঞ্জদলযোঃ ।

বরং কারাযেতে কনকমকরীকুণ্ডলযুগে

কটাক্ষৌ চাম্পেযস্তবকবিচরন্তাবিব বরৌ ॥ ৭২ ॥

ত্রযীবিদ্যারূপস্ত্রিতনুরহিমাংশুঃ প্রতিদিনং

শ্রুতী ভাবৎকেচিদ্বিবিধমকরীকুণ্ডলপদে ।

মিলিত্বাত্মাযং তে ঘনতরমুপাধিদ্বযমিতি

ব্যনক্তি শ্রীকারং নিখিলজগদ্দ্দীপকমুনে ॥ ৭৩॥

কপোলৌ যৌষ্মাকৌ স্ফুটমুকুরবিম্বপ্রতিভটৌ

ভৃশং সঙ্ঘর্ষিত্বাৎপ্রতিদিনসমারোপিতরুচৌ ।

নিজাকান্তির্নিত্যা কনকনিকষোঽত্যন্তমহিমা

ত্বদীযা নীচৈব প্রচুরতরকান্তিস্তবমুনে ॥ ৭৪ ॥

মুখেন্দুং দৃষ্ট্বা তে যদি বিশতি রাহুং প্রতি

ভযাচ্ছশী বক্ত্রং প্রাপ্যদ্বিগুণিতকলানাং নিধিরভূত্ ।

দ্বিজানাং রাজ্যত্বং প্রকটিতমতো দত্তশরণং

বলেনাহো স্বামিন্ কথমপি চ লভ্যো হি মহিমা ॥ ৭৫॥

তবাযং বিম্বোষ্ঠশ্চিবুকসহিতো বিদ্রুমলতা

সমাক্ষিপ্তা তির্যগ্যদি বহুপদং স্যাৎফলযুগম্ ।

ব্রজে তৎসাম্যং তন্নিহিতমুত বা পল্লবপদং

যদি স্যাত্তে নালং তুলযিতুমহো সংযমিপতে ॥ ৭৬॥

ভবদ্বাণীশ্রেণীং শ্রবণপুটসৌখ্যপ্রকরণীং

বিজেতুং বাক্ শ্রুত্বা স্বযমুত বিদিত্বাঽহমিতি ভাক্ ।

অশক্তা তেঽত্যন্তং ফণিললিতজিহ্বাগ্রমিষতঃ

প্রবিষ্টা বক্ত্রান্তং সিতমণিলসদ্বিদ্রুমগৃহম্ ॥ ৭৭॥

তবাবৃত্তা রেখাত্রযবিলসিতা কম্বুরভবত্ -

চ্ছিরাণামাধারঃ কথমভবদেতন্ন যদি চেত্ ।

অথেমামূহেঽহং ত্রিতি কবিহরাদ্যাকৃতিধরাং

তথা নো চেদ্বেদত্রিতযকলিতাং বাপি গণযে ॥ ৭৮॥

মহানন্তশ্চাসীদ্বিষধরবরো বাসুকিরসৌ

নিবর্হন্তৌ মর্ত্যাধিকভযকরত্বং গণযতাম্ ।

ভুজাকারৌ স্বীযৌ তব তু ভুজসত্ত্বং বিদধতাং

মুনে ভূতৌ স্নিগ্ধৌ সপদি বরদৌ চাভযকরৌ ॥ ৭৯॥

মুনে গঽভগাস্রোতোঽমরবরগিরিপ্রস্থফলকে

প্রসাদে স্বর্ণাঢ্যং প্রভবদভবদ্ভাগলুলিতম্ ।

ত্রিসূত্রং সুস্নিগ্ধং ধবলমুপবীতং কলযতে
মহাযোগিন্মূর্তিত্রযমপি বিলীনং তদভবা ॥ ৮০॥

প্রসিদ্ধঃ স্বর্ণাদ্রির্দিবি বিবুধবাচাবিতরণাত্ -
প্রশস্তৌ তে হস্তাবখিল পুরুষার্থ প্রকরণাত্ ।
জনানাং পাদাব্জদ্বিতযমধিকং প্রেম ভজতাং
মুনীন্দ্র ত্রৈলোক্যাদ্ভুতগণমণিক্ষীরজলধে ॥ ৮১ ॥

ইযং রোম্ণাং রাজির্বিলসতি মহানাভিসরসঃ
প্রবৃত্তা কুল্যেব প্রতিপতিতভঙ্গ্যস্ত্রিবলযঃ ।
নবালেখালোকত্রযবিভজনার্থে বিরচিতা
মুনে দত্তাত্রেয ত্বদুদরবিলগ্না বিলসিতাঃ ॥ ৮২ ॥

ধ্রুবং শম্পা মৌঞ্জীত্রিতযবলিরেখাবরতনো
রুরুক্ষোঃ প্রাসাদং খশয হৃদযাখ্যং তব হরে ।
মহালক্ষ্ম্যাশ্চঞ্চৎকনকমযসোপানপদবী
ন চেন্নাভীকুণ্ডোপরি চিদুপলব্ধা সুপরিখা ॥ ৮৩॥

প্রবৃত্তাবূরূ তে লসদুদরলোকব্রজধৃতেঃ
ধৃতৌ তাবদীন্দ্রস্ফুটপটুকটৌ সম্প্রকটিতৌ ।
কটৌ বিস্তারৌ যৎকটকফলকৌ তাবিব মুনে
মহাযোগিন্বিশ্বস্তর ইতি চ নূনং ত্বমধিসৃঃ ॥ ৮৪ ॥

কৃপালো বিশ্বেশ ত্রিভুবনতলে তে প্রমিতিতো

দিবারাত্রৌ স্থানং মিলতি বপুষো জানুযুগলম্ ।

অভক্তানিত্যেতৎকথিতমভিযুক্তৌঃ সমতনোঃ

প্রপুষ্টং ত্বং সম্প্রত্যপি ত্বদিদমর্থং হি সুদৃঢম্ ॥ ৮৫॥

জগন্মূলং স্রষ্টা সকলজগতাং সর্গকুশলো

ভবজ্জঙ্ঘে লক্ষ্মীকৃদসমশরস্য প্রকুরুতে ।

প্রকৃষ্টে তে বীক্ষ্য ভ্রমবদবিলক্ষ্যোঽল্পগুণবান্

মুনে তেনানঽভগস্তব তু বিমুখো লক্ষণবতঃ ॥ ৮৬॥

নরাণাং নানার্থপ্রদরসগুটিত্বং চ দধতৌ

মুনে গুল্ফৌ গূঢৌ তব চরণপুষ্ট্যা প্রকটিতৌ ।

ঘটাবৃত্তী নার্যা ইব সকলকৌ বৃত্তরুচিরৌ

বিরাজেতে তেজোনিকরকলিতাযাঃ সুবপুষঃ ॥ ৮৭॥

মদাধারং যুষ্মৎপ্রপদমতিপূজ্যং সুরুচিরং

ধ্রুবাত্মানং মত্বা জিতমিতি সদা কচ্ছপপতিঃ ।

বিবেশাধো ভূমের্যদি তদিদমেকং স্ময়করং

ত্বিদানীং তজ্জাতির্মুকুলিতশিরাশ্চাভবদহো ॥ ৮৮॥

মযা দত্তং কিঞ্চিন্ন যদি কলিতং বাসবমহং

তদা রোচির্জাতং জননমপি পঙ্কপ্রকটিতম্ ।

প্রবিশ্যেত্যাযোজ্যং ন চলতি হ যত্তৎপদধিযা

পদং তে তু শ্রীদং সকলসমযে শ্রীনিলযনম্ ॥ ৮৯॥

মুনে তে পাদাব্জং নবমমৃতপাদোদ্ভবমহো

শ্রিতস্তত্ সোদর্যং পশুপতিশিরোব্জং হিমকরঃ ।

নিবৃত্তং স্বস্যাঙ্কং ভবতি ভবদেকাত্মবপুষঃ

কথং ব্রহ্মাগারে পরমপুরুষা নাঙ্ঘ্রিভজনাঃ ॥ ৯০॥

ন চিত্রং তে পাদৌ বিতরত ইতি প্রার্থিতফলং

বিধিং শ্রীশং রক্ষাকলুষবিপদং দৃশ্যমতুলম্ ।

স্মরাস্তশ্রীগঙ্গাধরচরণশঙ্খাম্বুজ -

সুরদ্রুমাংশ্চ ত্বদ্ভাবানতজনসদানন্দকলনাত্ ॥ ৯১॥

ত্রিখণ্ডৈঃ শ্রীবিদ্যামনুবরভবৈর্ভাবকরিপো

বিবৃদ্ধস্তে মন্ত্রো বিষবদতি যো জ্যোতিরমলম্ ।

ষডর্ণং চন্দ্রার্কপ্রকররুচি তন্মে প্রভবতাং

সদা জ্ঞানানন্দং যুবতিনৃমযং লোচনপদম্ ॥ ৯২॥

সমুন্মীলদ্ভানুপ্রকররুচি বাগ্বীজমমলং

মরুত্বদ্গোপাভাং মদনলিপিমাধারকমলে ।

হৃদব্জে শক্ত্যাখ্যং সিতকরকরাভং শিরসিজে

সরোজে ত্বাং ধ্যাযেৎসকলপুরুষার্থান্ স লভতে ॥ ৯৩॥

চিদংশস্ত্বদ্রূপং কিমপি সবিতুর্মণ্ডলগতং

বরেণ্যং ভর্গো বৈ ত্রিবিধতনুদেবস্য বপুষি ।

মুনে ধীমহ্যাসীর্হরিরপি ধিযো যো ন

ইতরৎপ্রচোদাযাস্তত্ত্বং স্থিতিলযসৃজস্ত্বং মুনিপতে ॥ ৯৪॥

হরিত্তন্তুপ্রোতসদসি শিখরে শুভ্রকপটো

জগন্মূলস্থাণুস্ত্বমিতি শুভমস্পন্দমুনিভিঃ ।

ঝরীভিঃ স্বর্ণাঢ্যৈঃ পবনহতবার্বিন্দুনিকরৈর্জটা -

সক্তাব্জাহীরুচিরমভিষিক্তঃ স্থিত ইব ॥ ৯৫॥

দুরাচারো জারশ্চপলমতিরাজঃ পরবশঃ

পরদ্রব্যাকাংক্ষী বহুজনবিরোধী চ সততম্ ।

তথা চাহং পূতস্তব পদযুগস্পর্শবশতো হ্যযঃ

খণ্ডঃ স্বর্ণং ভবতি হি যদা সিদ্ধসুরতিঃ ॥ ৯৬॥

পরিক্রান্তা দেশা বহুতরধনস্যার্জনধিযা

কুলাচারং হিত্বা কুমতিনৃপসেবাপি চ কৃতা ।

বিধাযাহং শ্রান্তঃ কিমপি ন চ তু বপুষা

শ্রিতং ত্বৎপাদাব্জং শ্রিতমনুজমন্দারমধুনা ॥ ৯৭॥

ত্বদীযো মে দেহস্ত্বমপি পিতরৌ ভ্রাতৃসুহৃ -

দস্ত্বমেব ব্রহ্মন্মে সুতহিতগৃহক্ষেত্রনিবহাঃ ।

ত্বমেব প্রাণো মে ধনমপি মম ত্বং তব পদং
ন জানে মধ্যেব স্থিতমপি মহস্নেযমধুনা ॥ ৯৮॥

নমস্তে তারাযামৃতজলধিধাম্নেঽধিমহসে
নমস্তে ব্রহ্মাদ্যৈঃ মুনিসুরবরৈঃ ক্লৃপ্তমহসে ।
নমস্তুভ্যং নারাযণমুনিবিলাসায ভবতে
মনূনাং কোটীনামচলগণিতানাং চ পতযে ॥ ৯৯॥

নমস্তে দেবৈরপ্যবিদিতমহিম্নেঽতিযশসে
নমস্তে দিক্পালপ্রকটমুকুটালঙ্কৃতপদে ।
নমস্তে তেজস্বিন্নতমনুজমন্দারবপুষে
নমো দত্তাত্রেযাকৃতিহরিহরাজায মহতে ॥ ১০০॥

নমস্তে পাপৌঘাচলবিততিসংহারপবযে
নমস্তে দারিদ্র্যব্যথিতজনদৈবান্তবিধযে ।
নমস্তে রোগার্তানত মনুজদিব্যৌষধিদৃঅশে
নমস্তে দৈবং মে নহি জগত্যাং তব পদম্ ॥ ১০১॥

অসৌ দত্তাত্রেযস্তুতিযুতকৃতির্জ্ঞানলহরী
সুধাধারাপূরাখিলনিগমসারানুপঠতাম্ ।
শ্রুতশ্রীবিদ্যাযুর্বিভবধনধান্যামৃতচযং
দদাত্যেবাত্যন্তং জযতি সকলাহ্লাদজনিকা ॥ ১০২॥

ইতি দলাদনমুনিবিরচিতা শ্রীদত্তপদপ্রাপিকা

শ্রীদত্তাত্রেযজ্ঞানলহরিঃ সম্পূর্ণা ॥

Encoded and proofread by Madhavi Upadrasta mupadrasta at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Datta Lahari Lyrics in Bengali PDF
% File name : dattalahari.itx
% Category : lahari
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Madhavi Upadrasta mupadrasta at gmail.com
% Proofread by : Madhavi Upadrasta mupadrasta at gmail.com
% Latest update : May 25, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 8, 2015 ] at Stotram Website